Topic 27

## गतिसमासः

साक्षात्प्रभृतीनि च कृञि वा गतिसंज्ञानि स्युः । च्व्यर्थे इति वाच्यम् । साक्षात्कृत्य, साक्षात् कृत्वा । लवणंकृत्य, लवणं कृत्वा । मान्तत्वं निपातनात् । अनत्याधाने उरसिमनसी । उरसिकृत्य, उरसि कृत्वा । अभ्युपगम्येत्यर्थः । मनसिकृत्य, मनसि कृत्वा । निश्चित्येत्यर्थः । अत्याधानमुपश्लेषणम्, तत्र न । उरसि कृत्वा पाणिं शेते । मध्ये पदे निवचने च । एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने । मध्ये कृत्य, मध्ये कृत्वा । पदे कृत्य, पदे कृत्वा । निवचने कृत्य, निवचने कृत्वा । वाचं नियम्येत्यर्थः । नित्यं हस्ते पाणावुपयमने । कृञि । उपयमनं विवाहः । स्वीकारमात्रमित्यन्ये । हस्तेकृत्य । पाणौकृत्य । प्राध्वं बन्धने । प्राध्वम् इत्यव्ययम् । प्राध्वंकृत्य । बन्धनेनानुकूल्यं कृत्वेत्यर्थः । प्रार्थनादिना त्वानुकूल्यकरणे प्राध्वं कृत्वा । जीविकोपनिषदावौपम्ये । जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य । औपम्ये किम् जीविकां कृत्वा । प्रादिग्रहणमगत्यर्थम् । सुपुरुषः । अत्र वार्तिकानि ।

'प्रादयो गताद्यर्थे प्रथमया' प्रगत आचार्यः प्राचार्यः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया। अतिकान्तो मालामतिमालः। 'अवादयः क्रुष्टाद्यर्थे तृतीयया (अवकुष्टः कोकिलया अवकोकिलः। 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्यध्ययनः 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। 'कर्मप्रवचनीयानां प्रतिषेधः' वृक्षं प्रति।